National Journal of
Hindi & Sanskrit Research

ISSN: 2454-9177
NJHSR 2020 (1(31): 116-120
© 2020 NJHSR
www.sanskritarticle.com

डॉ. नानूराम जाटः
रा. उ. प्रा. सं. विद्यालय,
माताजी भोपावास, चौमूँ

Correspondence:
डॉ. नानूराम जाटः
रा. उ. प्रा. सं. विद्यालय,
माताजी भोपावास, चौमूँ

लौकिकसाहित्ये गोतत्त्व विमर्शः

डॉ. नानूराम जाटः

रामायण महाकाव्ये गोतत्त्वविमर्शः

अस्मिनध्याये भारतवर्षस्य आदिकाव्यं गवेषणाय निर्धारितम्। आदिकाव्यस्य महत्वं सर्वैरेव अङ्गीकृतम्। इदमादिकाव्यं वाल्मीकिना विरचितम्। सम्पूर्णे संसारे अस्य वाल्मीकिरामायणस्योत्कृष्टं स्थानं वर्तते। महाकाव्यानि विविधासु भाषासु बहूनि प्राप्यते तथापि वाल्मीकिये रामायणे यथा आस्तिक्तायाः धर्मस्य, भक्तेः सामञ्जस्यं यथात्र पठ्यते नान्यत्र द्रष्टुं शक्यते। रामायणस्य सुन्दरकाण्डं विवेचकानां मते सर्वोत्तमं विभाति यतोहि गाथा वर्णिता। परन्तु चिन्तनेन समग्रस्य काण्डस्य महत्वं यथास्थानं उत्तममेव। सर्वत्र शिक्षायाः उत्सः वर्तते। कथामाध्यमेन लोकानां कल्याणं समर्थित।

अयोध्याकाण्डमेवालोकयामस्तावत् कविरत्र मानवस्वभावस्य संघर्षस्य च चित्रणं काव्यशैल्यां कृतवान्।

काण्डेऽस्मिन् भगवतः श्रीरामस्य श्रेष्ठतायाः महाराजस्य दशरथस्य दुर्बलतायाः कैकेय्याः दुराग्रहस्य भाग्यविरुद्धं लक्ष्मणस्य सिंहगर्जनायाः सीतायाः पतिव्रतस्य कौसल्यायाः गौरवस्य, सुमित्रायाः बुद्धिवैभवस्य, गहराजस्य मित्रतायाः महात्मनोभरतस्य उदारचरितस्य च समग्रं चिन्तनमत्र वर्तते। आर्यसभ्यतायाः संस्कृतेश्च आदिकाव्यमस्ति। श्रीरामः एकः आदर्शो भ्राता, आदर्शः पतिः आदर्शः पुत्रश्च सम्राट् आदर्शः वर्तते।

लक्ष्मणोऽपि तथैव ज्येष्ठस्य दुःखे सुखे सहायको बभूव। भरतस्य कथा एव - सकलंभोगमैश्वर्यं च तत्याज। सीतायाः चरितं किमत्र वक्तव्यं साकर्मभिश्च पतिमेव सेवते। सामाजिकशिक्षायाः कृते इदमादिकाव्यं ज्ञानविज्ञानयुतं विद्यते।

रामायणं सार्वकालिको ग्रन्थः प्रतिभाति। अस्य आदिकाव्यस्य नायकः एकः आदर्शः पुरुषः अस्ति। संसारे ये ग्रन्थाः प्राचीनाः प्राप्यन्ते तेषु अस्य ग्रन्थस्य गौरवं सर्वे आलोचकाः विद्वांसः प्रकटयन्ति। रामायणमिदं प्रायेण अनुष्टुप्छन्दसि उपनिबद्धम्। तमसा तटे काममोहितं क्रौञ्चवधं दृष्ट्वा कवेर्मुखात् अकस्मादेव श्लोकः निर्गतः -

मा निषाद प्रतिष्ठां त्वमगमः शाश्वतीसमाः।
यत्क्रौञ्चमिथुनादेकमवधीः काममोहितम्।।[1]

वाल्मीकेः प्राक् मनुना मनुस्मृतिः अनुष्टुप् छन्दसि विरचिता। अनादिकाले च वेदस्य प्रादुर्भावोऽपि अनुष्टुप् माध्यमेन श्रूयते। सन्ति वेदे अनेकानि गायत्र्यादीनि छन्दांसि नो तत्र आक्षेपः। रामायणानि बहूनि सन्ति येषु रामस्य कथानकं विस्तरेण वर्णितम्। प्रयुक्तमिदं वाल्मीकिरामायणं प्राचीनतरं काव्यधर्मोपेतं वर्तते। अस्य देशस्येतिहासः अन्यैः विधर्मिभिः कल्पितः। यथार्थचिन्तन इतिहासे कुत्रापि न प्राप्यते। स च इतिहासः अस्माकं शिक्षणसंस्थानेष पठ्यते पाठ्यते च। पाश्चात्यानां दृष्टौ अयं संसारः षट् सहस्त्रसंवत्सरः प्राचीनः अस्ति। तथैव भारतस्यापि इतिहासः तैः स्वीक्रियते। पाश्चात्यानां मते वेदानामविर्भावकालः ईसापूर्वं द्विसहस्त्रवर्षं भवति रामायणं च ईसातः चतुःशतसंवत्सरपूर्वं वर्तते। अयं तिथिनिर्णयः सर्वथा कपोलकल्पितः असत्याधारितः। वायुपुराणे उल्लेखो विद्यते -

त्रेतायुगे चतुर्विंशे रावणस्तपसः क्षयात्।
रामं दाशरथिं प्राप्य सगणः क्षयमीयवान्।।[2]

अयमर्थ: आचारभ्रष्टो रावण: चतुर्विंशते त्रेतायुगे दशरथात्मजे रामेण साकं युद्धं कृत्वा सान्वय: हतः। अत्र गणितस्याश्रयेण विचारयामि चेत् चतुर्विंशतितमे त्रेतायुगे रामस्य जन्मकाल: इदानीं अष्टाविंशति: त्रेतायुगं वर्तते तेन

4320000 × 4 = 17280000 वर्षम्

द्वापरस्य च - 864000 वर्षम्

कलियुगस्य - 5070 वर्षम्

योग: - 18149070

अनेन प्रकारेण रामस्य काल: सम्प्रत्यधिक एकोनपञ्चाशदत्तरैकाशीतिलक्षाधिकैककोटि वर्षं भवति।

पाश्चात्यानां विचारे महाभारतं रामायणात् प्राक् कालीनं अस्ति। महाभारते रामस्य चरितं दृष्ट्वा श्रुत्वा च वाल्मीकि: स्वतन्त्रं काव्यं वाल्मीकिरामायणं रचयामास। परन्तु तथ्यमिदं सर्वथा भ्रान्तिमूलकम्।

मेघनादेन सह हनुमत: संवाद: द्विचत्वारिंशसर्गे वर्णित:। मेघनाद: कृत्रिमा सीतां हन्तुमुद्यतो वर्तते। तत्रैव हनुमान् तं मेघनादं प्रबोधयामास। स्त्रीवध: सर्वथा निन्दित: अतएव। कर्मेदं त्वया न साध्यम्। तद्यथा -

न हन्तव्य: स्त्रियश्चेति यद् ब्रवीषि प्लवङ्गमद।

पीडाकरममित्राणां यत्स्यात् कर्तव्यमेव तत्।।[3]

अस्य श्लोकस्य भाव: महाभारते द्रोणपर्वणि दृश्यते -

अपि चायं पुरा गीत: श्लोको वाल्मीकिना भुवि।

न हन्तव्या स्त्रिय इति यद ब्रवीषि प्लवङ्गम।।

सर्वकालं मनुष्येण व्यवसायवता सदा।

पीडाकरममित्राणां यत्स्यात् कर्तव्यमेव तत्।।[4]

द्वाभ्यां श्लोकाभ्यां प्रमाणमिदं सुपुष्टं भवति यत् महाभारते वाल्मीके: श्लोकस्योदाहरणपूर्वकं चर्चा वर्तते तर्हि अवश्यमेव आदिकाव्यमिदं महाभारत प्राचीनतरम। द्वितीयं च प्रमाणं महाभारतान्तरं यस्य पुराणस्य किं वा उपपुराणस्य रचनाऽभवत् तत्र सर्वत्र उवाचशैल्या: प्रयोग: बाहुल्येन पठ्यते ।

तद्यथा श्रीभगवानुवाच, अर्जुन उवाच। अयमुवाच: श्लोकांश: नास्ति।

तत्रैव रामायणस्य गवेषणेन पश्याम: श्लोकमध्ये पठित: तद्यथा - राजावचनमब्रवीत्। वक्तेमेवोपचक्रमे। सत्यमेतदब्रवीमि ते इत्यादीनि वाक्यानि दरीदृश्यते। वाल्मीकि रामायणे स्वातन्त्रयेण उवाच इति न दृश्यते। अवश्यमेव रामायणं महाभारतात् पूर्वकालीनमिति नास्ति संशयावलेश:।

रामायणस्य कथानकं काल्पनिकं नास्ति। सर्वं यथार्थचित्रणं कविना निरूपितम्। वाल्मीकियरामायणे आलोचकानां मते कुत्रचित् विरोध: दृश्यते। किष्किन्धा काण्डे सुग्रीवम् उद्दिश्य रामो ब्रूते -

कार्तिके समनुप्राप्ते त्वं रावणवधे यत्।[5]

अग्रे अस्मिन्नेव काण्डे अङ्गादो युवराजः कथयति -

वयमाश्वयुजे मासि कालसंख्या व्यवस्थिताः।

प्रस्थिता: सोऽपि चातीत: किमत: कार्यमुत्तरम्।।[6]

अयं भाव: वयं सर्वे सीतान्वेषणाय आश्विनेमासि निर्गता: ते काला: व्यतीता:। राम: कार्तिकमासस्य चर्चामकरोत् तत्रैव अंगद: आश्विनस्य कथमत्र भेदः।

अनेके भावरसिका: प्रकारान्तरेण अस्य समाधानं कुर्वन्ति परन्तु आर्यसमाजे दीक्षिता: जगदीशानन्द सरस्वतीमहाराजा: सप्रमाणं समाधानं ददुः ।

श्रीराम: औदीच्यः आसीत् अयोध्या उत्तरभारते प्रसिद्धा। अङ्गद: दाक्षिणात्य: दक्षिणप्रदेशस्थः। कृष्णपक्षस्य योहिभेद: अद्य अस्माभिरवलोक्यते स एव भेदः श्रीरामस्य कालेऽपि आसीत्। कस्यापि मासस्य शक्लपक्ष उत्तरदक्षिणयोर्मध्ये समानो भवति। आश्विनशुक्लपक्षस्य विषये श्रीराम: यथा ब्रूते तथैव वानरा: वदन्ति तथा च आश्विनशुक्लपूर्णिमाया: अग्रिमोदिवस: श्रीरामस्य कृते कार्तिककृष्णपक्ष: प्रतिपत्तिथि: आसीत् सा च तिथि: वानराणां कृते आश्विनकृष्णप्रतिपत् आसीत् अतएव वाल्मीकि: रामाङ्गदयो: वचनस्य रक्षणाय श्लोकं रचयामास। रामायणे कल्पनाया: स्थानं कुत्रापि नास्ति। यथार्थस्य रक्षणं वाल्मीकिना विहितम्।

वाल्मीके: जीवनवृत्तं कीदृशमासीत् इति विषये काचित् किंवदन्ती प्रचलिता। तया श्रूयते लोकानां मध्ये पूर्वावस्थायामसौ तस्कर: आसीत्। मार्गे लुण्ठनं हिंसनं च तत्कर्म। परन्तु अन्त: लुण्ठनं हिसनं च तत्कर्म। परञ्च अन्त: साक्ष्येण प्रतीयते ऋषे: कुले उत्पन्नोऽसौ दृढव्रत: बभूव। तस्य जन्मविषये स्वयमेव ऋषि: वाल्मीकि: स्वयमेवाब्रवीत् -

प्रचेतसोऽहं दशम: पुत्रो राघवनन्दन।

मनसा कर्मणा वाचा भूतपूर्व न किल्विषम।।

अयं श्लोकः सीतायाः चरित्रविषये ऋषिणा रामं प्रति कथितः ।

सामान्य परिचयं दत्वा इदानीं प्रकृतमनुसरामि। सर्वप्रथम बालकाण्डे चतुर्थे सर्गे दशरथराज्यस्य वर्णनं वर्तते। तृतीये सर्गे च नवमः श्लोकः प्रमुखः विभाति। अस्मिन् श्लोके -

दुर्गगम्भीरपरिखां दुर्गामन्यैर्दुरासदाम्।

वाजिवारणसम्पूर्णां गोभिरुष्ट्र: खरैस्तथा।।[7]

अयोध्यायां वेदार्थतत्वज्ञातारो विबुधा: वसन्ति तथा अन्ये च धनधान्य संग्राहका: जना:। निजलाभतुष्टा: निर्लोभा:, सत्यवक्तारश्च जना: आसन्। दरिद्रजना: न वसन्ति स्म। सर्वे गृहस्था: धनधान्यसम्पन्ना: पशुधनयुक्ताश्च बभूवुः। अयोध्यायां दुराचारिण: नासन् -

तस्यां पुर्यामध्योयां वेदवित्सर्वसंग्रहः।

दशरथो महातेजा: वसञ्जगदपालयत्।।

तस्मिन् पुरवरे हृष्टां धर्मात्मानो बहुश्रुता:।

नरास्तुष्टा धनै: स्वै: स्वैरलुब्धा सत्यवादिनः।।

नाल्पसन्निचय कश्चिदासीत्तस्मिन्पुरोत्तमे।

कुटुम्बी यो ह्यसिद्धार्थोगवाश्वधनधान्यवान्।।[8]

अयोध्यायां वेदतत्वमर्मज्ञा: प्रयोगनिपुणा: ब्राह्मणा: द्विजा: वसन्ति स्मा एषा सूचना धर्मस्य संस्थापनाय वर्तते। श्रौतयज्ञसंचालनाय गवां परिपालनं सर्वत्र आवश्यकम्। गां विना कस्यापि यज्ञस्य अनुष्ठानं न सम्भवनि अत्र वक्तुं शक्यते गोपालनं गृहस्थानां प्रथमं कर्म आसीत्। नो चेक यज्ञ:संपद्यते। विधिहीन: यज्ञ: यजमानस्य सकलं मनोरथं नाशयति। उक्तञ्च -

विधिहीनस्य यज्ञस्य सद्यः कर्ता विनश्यति।
तद्यथा विधिपूर्वं मे क्रतुरेष समाप्यते।।[9]

अत्रैवाष्टमे सर्गे पुत्रेष्टिं कृतवान्। अस्यामिष्टौ यत् पायसं लब्धं तदपि दुग्धेन निर्मितमेव।

ततः प्राक्रमदिष्टिं तां पुत्रीयां पुत्रकारणात्।
जुहावाग्नौ च तेजस्वी मन्त्रदृष्टेन कर्मणा।।
अथ वै यजमानस्य पावकादतुत्मप्रभाम्।
तप्त जाम्बूनदमयीं राजतान्तपरिच्छदाम्।।
दिव्यपायस सम्पूर्णां पात्री पत्नीमिवप्रियाम्।
प्रगृह्य विपुलां दो· समवेक्ष्याब्रवीदिदम्।।
इदं तु नृपशार्दूल पायसं देवनिर्मितम्।
प्रजाकरं गृहाण त्वं धन्यमारोग्यवर्धनम्।।[10]

एतेषां श्लोकानां समीक्षणेन ज्ञायते दशरथस्य राज्ये गृहस्थानां को गोपालनमावश्यकं धार्मिकं च कृत्यम् आसीत्। सर्वेषां गृहस्थानां पार्वे गावः आसन्। यज्ञसम्पादनाय गोदुग्धं, गोघृतं, गोदधि परमाश्यकं तत्वं शास्त्रे कथितम्। दशरथस्य राज्ये वर्णधर्मानुसारेण कार्यं भवति स्म। तत्रापि केचन दुष्टाः यज्ञविरोधिनः आसन्। बालकाण्डे विश्वामित्रस्य यज्ञविध्वंसनाय केचन दुष्टाः समाययुः। तेषां नामानि अधः प्रस्तूयन्ते -

अथ काले गते तस्मिन् षष्ठेऽहनि समागते।
आकाशे च महाशब्दो प्रादुरासीद्भयानकः।।
मारीचश्च सुबाहुश्च तयोरनुचराश्चये।
आगम्य भीमसंकाशारुधिरौघमवासृजन।।[11]

इमे राक्षसाः यज्ञविध्वंसकारः प्राचीनसमये यथा आसन् इदानीमपि तथैव सन्ति। अग्रे अस्मिनेव काण्डे सीतायाः विवाहः रामेण सह कारितः। पूर्वजानां नामस्मरणपूर्वकं कन्यादानं रामाय ददौ महाराजः जनकः। मर्यादायाः पालनं सर्वत्र दृश्यते। महाराजः दशरथः स्वयमेवागत्य वंशस्य सम्पूर्ण इतिवृत्तं श्रावयित्वा जनकं कन्यारत्नं ययाच। तद्यथा -

रामलक्ष्मणयोरर्थे त्वत्सुते वरये नृप।
सदृशाभ्यां नरश्रेष्ठ सदृशे दातुमर्हसि।।[12]

एवं दशरथस्य निवेदनं स्वीकृत्य जनकः नैनं वंशं श्रावयामास अस्मदीयोऽयं वंशः सर्वथा पवित्रः कुलीनश्च। पूर्वजाः सर्वे राजर्षयः बभूवुः। महाराजः जनकः राजर्षेः ह्रस्वरोम्णः पुत्रः तद्यथा -

तस्य पुत्रद्वयं राज्ञो धर्मज्ञस्य महात्मनः।
ज्येष्ठोऽहमनुजो भ्राता मम वीरः कुशध्वजः।।
ददामि परमप्रीतो वध्वौ ते मुनिपुङ्गव।
सीतां रामाय भ्रदं ते ऊर्मिलां लक्ष्मणाय च।।
वीयशुल्कां मम सुतां सीतां सुरसुतोपमाम्।
द्वितीयामूर्मिलां चैव त्रिर्ददामि न संशयः।।[13]

विवाहे निश्चये कृते महाराजो दशरथः पूर्वजानां तृप्त्यर्थं आभ्युदयिक कर्म कर्तुम् निवासस्थानमाजगाम। सामान्येन श्लोके श्राद्धस्य चर्चा कृता। परन्तु विवाहावसरे श्राद्धं वृद्धिसंज्ञकमेव न च मृतकोद्देश्यम्। अत्र प्रकरणे श्राद्धकर्मणः प्रसंगः कथमागतः इति प्रश्ने जाते कर्मण्यत्र गोदानस्य माहात्म्यं निर्दिष्टम्।

विवाहावसरे गोदानं निश्चितमेव दातव्यम्। यथाचाह -

स गत्वा निलयं राजा श्राद्धं कृत्वा विधानतः।
प्रभाते काल्यमुत्थाय चक्रे गोदानमुत्तमम्।।
गवां शतसहस्राणि ब्राह्मणेभ्यो नराधिपः।
एकैकशो ददौ राजा पुत्रानुद्दिश्य धर्मतः।।
स्वर्णशृंगाः सम्पन्ना सवत्सा कांस्यदोहना।
गवां शतं सहस्राणि चत्वारि पुरुर्षभः।।
वितमन्यच्च सुबहु द्विजेभ्यो रघुनन्दनः।
ददौ गोदानमुद्दिश्य पुत्राणां पुत्रवत्सलः।।[14]

अस्माक आयोणां कृते गोदानं पुण्यस्य मंगलस्य च कार्यं भवति। सर्वेषु कर्मसु तीथेषु जन्म-मरण-विवाहेषु च गोदानं प्रशस्तम्। इदं कर्म यथा मनुष्याणां कृते प्रशस्तं तथैव वनेचराणामपि कृते आसीत्। बालीनामको वानरः सुग्रीवस्य ज्येष्ठो भ्राता। बालीनामको वानरः सुग्रीवस्य ज्येष्ठो भ्राता। स खलु बलेन, हठेन, कामेन, लोभेन च मुग्धः मोहग्रस्तः कनिष्ठस्य सुग्रीवस्य पत्नीमपहृत्य वशमानीय स्वनिवासे रक्षयामास। सुग्रीवं च बहुविधं प्रताड्य राज्यात् निष्काशनं चकार। स सुग्रीवः ऋष्यमूक् पर्वते कतिपयैः वानरैः सह स्वनिवासमकरोत्। ऋषेः शापभयात् बालिः तत्र गन्तुमसमर्थः आसीत्।

सुग्रीवस्य सहायकः हनुमान् नामधेयः वानरः सर्वविधापारंगतः आसीत्। अत्रेदं बोध्यं वानर इति एतेषां वनवासिनां उपनाम भवति स्म। न चासौ शाखामृगः वानर इति। रामः एकेन बाणेन बालिं जघान। तत्रैव स बालिः रामं मर्यादा पुरुषोत्तमं बहुविधं भर्त्सनं चकार। यदासौ मूछितोऽभवत् रामस्य बाणेन तत्रैव रामलक्ष्मणौ तत्र पार्वे जग्मतुः। रामलक्ष्मणौ वीक्ष्य बालिः प्रोवाच। त्वं हे राम दृढव्रतोऽसि राजकुलेः चोत्पन्नः। मां हत्वा त्वं किं ख्यातिं लब्धवान्। नाहं तव राष्ट्रे किञ्चोपकारं कृतवान्। न च तव बलं त्वां च कुत्रापि तिरस्कार कृतवान् तथापि अपराधरहितं माम कथं हतवान। मां लब्धम् । सज्जनानां समाजे क्व तव प्रतिष्ठा स्यात्। जनाः किं वदेयुः। केचन श्लोकाः तत्रत्याः प्रमाणाय उदाह्रियन्ते -

विषये वा पुरे वा ते यदा नापकरोम्यहम्।
न च त्वमवजाने च कस्मात्त्वं हंस्यकिल्बिषम्।।
हत्वा बाणेन काकुत्स्थ मामिहानपराधिनम्।
किं वक्ष्यसि सतां मध्ये कृत्वा कर्म जुगुप्सितम्।।[15]

बाली यद्यपि लोकानां दृष्टौ अधर्माचरणं कृतवान्। परन्तु शास्त्रस्य महत्वं जानाति स्म। मूछितो बालिः रामं प्रति उक्तवान्। पश्यताम् तावत् यो हि मनुष्यः राजानं हन्ति। ब्राह्मणान् हन्ति। गां हन्ति, चौरकर्म करोति, प्राणिनां घातकोऽस्ति परिवेत्ता च वर्तते। यः ज्येष्ठं भ्रातरं परित्यज्य स्वयमेव आदौ विवाहं करोति स शास्त्रे परिवेत्ता पदेन उक्तः। एते सर्वे नरकं यान्ति। अत्रायं विशेषेण अनुसन्धानयोग्यः वनेचराणां राजा बालिः असावपि सम्यक् धर्मं वेति। तत्रापि गोधनस्य चर्चा तेन कृता -

राजहा ब्रह्महा गोघ्नश्चोरः प्राणिवधे रतः।
नास्तिकः परिवेत्ता च सर्वे निरयगामिनः।
सूचकश्च कदर्यश्च मित्रघ्नो गुरुतल्पगः।
लोकं पापात्मनामेते गच्छन्त्यत्र न संशयः।।
त्वया नाथेन काकुत्स्थ न सनाथावसुन्धरा।
प्रमदाशीलसम्पन्ना धूर्तेन पतिना यथा।।
शठो नैष्कृतिकः क्षुद्रो मिथ्या प्रश्रितमानराः।

कथं दशरथेन त्वं जातः पापो महात्मना।।[16]

क्रुद्धो बालि: बहुविधं रामं भर्त्सयामास। बालि: सतर्कं रामं प्रपच्छ कथं माम् हतवान्। अन्ते बालि: अकथत् मम मृत्युर्भवति तेन नाहं दु:खी भवामि यतोहि समये समागते एकस्मिन् दिने जातस्य निश्चप्रचं मृत्युर्भवति। मम दु:खस्य खेदस्यैकमेव कारणं प्रामुख्येन भवति त्वया यदनुचितं कर्माद्यनुष्ठितं तस्योत्तरं लोके कथं दास्यसि किं च दास्यसि कथमौचित्यं साधयिष्यसि इति सम्यग्विचार्यताम् - यथा -

काममेवंविधो लोकः कालेन विनियुज्येत।
क्षमं चेद्भवता प्राप्तमुत्तरं साधु चिन्त्यताम्।।[17]

अस्य समाधानं समुचितमुत्तरं रामेण प्रदत्तम्। इयं किष्किन्धा पृथक् राष्ट्रं नास्ति। राज्यस्यास्य नियम: पृथक् न वर्तते। इयं भूमि: इक्ष्वाकुवंशस्य अधिकारे सम्पूर्णामही वर्तते। पर्वतोऽपि तस्मिन्नधिकारे. अस्ति। तस्य। सम्प्रति शासको महात्माभरत: भूमण्डलं प्रशासति यथा च -

इक्ष्वाकूणामियं भूमिः सशैलवनकानना।
मृगपक्षिमनुष्याणां निग्रहानुग्रहेष्वपि।।
तां पालयति धर्मात्मा भरतः सत्यवागृजुः।
धर्मकामार्थतत्वज्ञो निग्रहानुग्रहे रतः।।
नयश्च विनयश्चाभौ यस्मिन् सत्यं च सुस्थितम्।
विक्रमश्च यथा दृष्टः स राजा देशकालवित्।।[18]

रामस्य कृत्यं सर्वथा शास्त्रसम्मतं आसीत्। धर्मस्य रक्षणार्थं पालनार्थं च रामस्य प्रादुर्भावः। अत्रैवाध्याये वाल्मीकिना मनु: स्मारित:। मनो: द्वौ श्लोको प्रमाणत्वेन उपस्थापितौ। तत्र प्रथम: उपक्रम: -

श्रूयते मनुना गीतौ श्लोकौ चारित्रवत्सलौ।
गृहीतौ धर्मकुशलैस्तत्तथा चरितं हरे।।
राजभिधृतदण्डास्तु कृत्वा पापानि मानवाः।
निर्मलाः स्वर्गमायान्ति सन्तः सुकृतिनो यथा।।
'शासनाद्वा विमोक्षाद्वा स्तेनः स्तेयाद्विमुच्यते।
राजा त्वशासन्पापस्य तदवाप्नोति किल्बिषम।।[19]

किष्किन्धाकाण्डे चतुर्विंशसर्गे यत्र सुग्रीव: शासको वर्तते प्रजाः सर्वाः धमाचरणं कर्वन्त्य: जीवनं यापयन्ति। पशूनां पक्षीणाशन सन्ति। पशूनां पक्षीणाञ्च वने सुरभितं वातावरणं दृश्यते। तत्रैव: गवां मध्ये वृषभोऽपि राराजते।

मदप्रगल्भेषु च वारणेषु गवां समूहेषु च दर्पितेषु।
प्रसन्नतोयासु च निम्नगासु श्रियं विभतज्याद्य शरत्प्रवत्ता।।[20]

अत्रैव षड्विंशे सर्गे लक्ष्मण: रामेणादिष्ट: कोपयुत: सुग्रीवं भर्त्सयामास। मित्रस्योपकार: सर्वतो विधेय:। मित्रेण सह वञ्चनं कदापि न कर्त्तव्यम्। राजा राज्यासनारूढ: यदि कुमार्गगो भवति प्रतिज्ञां च न पालयति स क्रूरकर्मा इत्युच्यते। य: राजा एकस्य अश्वस्य कृते मिथ्यालापं कुरुते स शताश्ववधानां पापं युंक्ते। एकस्या: गो: कृते यो हि राजा मिथ्याभाषणं कुरुते स सहस्रगोवधस्य पापं भुंक्त। पुरुषस्य कृते य: असत्यं भाषते स आत्मवधस्य पापं तथा स्वजनवधस्य च पापं सेवते यथा -

यस्तु राजा स्थितोऽधर्मे मित्राणामुपकारिणाम्।
मिथ्याप्रतिज्ञां कुरुते को नृशंसतरस्ततः।।
शतमश्वानृते हन्ति सहस्रं तु गवानृते।
आत्मानं स्वजनं हन्ति पुरुषः पुरुषानृते।।[21]

एवं सर्वत्र संवादे, प्रतिज्ञां, दानकर्मणि, यज्ञे, उपमायां च गवां प्रतिष्ठा श्रूयते । सम्पूर्णे वाल्मीकीय रामायणे प्रकरणानुरोधेन गोधनस्य महत्वं द्रष्टुं शक्यते। येऽत्र रामस्य पक्षे यौद्धार: सन्ति सर्वे आर्यधर्मोपासका: युद्धकाण्डे वीराणां संहार:, लक्ष्मणस्य च मूर्छाकाल: रामस्य कृते चिन्ताया: विषय: आसीत। अन्ते रावणस्य वधो भवति। विभीषणाय च राज्यं समर्प्यते। एषा सूचना हनुमता सीतायै दत्ता। हनुमान् रामस्य सन्देशं तथा सम्पूर्णमितिवृत्तं च श्रावयामास। सीता हनुमत् मुखात् विजयवतीं सूचनां प्राप्य प्रहृष्टमना हनुमते किञ्चित पुरस्कारं द्रव्यमनुपमेयं दातुमिच्छति परन्तु सीताया: पार्श्वे तावत् तत्र द्रव्याणां अभाव: अत एव आह -

एवमुक्ता हनुमता सीता धर्मे व्यवस्थिता।
अब्रवीत् परमप्रीता हर्षगद्गदया गिरा।।
न हि पश्यामि तत् सौम्य पृथिव्यामपि वानर।
सदृशं यत्प्रियाख्याने तवदातुं भवेत् समम्।।
हिरण्यं वा सुवर्णं वा रत्नानि विविधानि च।
राज्यं वा त्रिषु लोकेषु नैतदर्हति भाषितुम्।।[22]

अत्रैव हनुमान् राक्षसीनां वधायाज्ञां य याच ते सीतां। परन्तु सीतायाः मनसि ता: प्रति वैरभावो नासीत्। सा उक्तवती इमा राक्षस्य: रावणस्या सन्ति। यथा रावणेन आदिष्टा तथैव ताः कृताः। अत्र तासां दोष: कुत्रापि नास्ति। भगवती सीता प्रसंगे एका कथां श्रावयामास हनुमन्तम्।

एक: व्याघ: वनं गत्वा पशून् हत्वा परिकरं पालयामास। एकदा एक: सिंह: तं व्याधं हन्तुमुद्यत: सन् दाधाव। भीतोऽसौ व्याध: वृक्षमारोहणं कृतवान्। दौर्भाग्यात् पूर्वत एव एक: भल्लुक: वृक्षारूढ: आसीत्। सिंहः तं भल्लुकं प्रबोधयामास अयं व्याध: प्रतिदिनं वनजीवानां वधं करोति तस्मादेवं पापिनं वृक्षात् पातय। सिंहस्य वच: श्रुत्वा भल्लुकोऽब्रवीत् नाहं तथा कर्तुं पारये यतोहि असौ मम शरणापन्नोऽस्ति। इत्युक्त्वा भल्लुक: वृक्षोपरि अशयत्। सुसुप्तं भल्लुकं दृष्ट्वा सिंह: व्याधमुवाच त्वमेनं शयानं भल्लुकं वृक्षात् पातय। अहं तं भुक्त्वा त्वां त्यजिष्ये। सिंहस्य वचनं श्रुत्वा मत्वा च व्याघ: तथैवाकरोत् परन्तु पतन्तोऽसौ भल्लुक: मध्ये वृक्षस्यैकां शाखां जग्राह तथा चात्मानं रक्षितवान्। तत: स सिंहः पुनरैकबारं भल्लुकं प्रबोधितवान् परन्तु सापराधं व्याधमपि ररक्ष। इति कथां श्रावयित्वा सीता हनुमन्तं उपदिदेश -

न परः पापमादत्ते परेषां पापकर्मणाम्।
समयो रक्षितव्यस्तु सन्तश्चारित्रभूषणाः।।
पापानां वा शुभानां वा वर्धार्हाणां प्लवङ्गम्।
कार्यं करुण्यमार्येण न कश्चिन्ननापराध्यति।।[23]

अनेन प्रकारेण वाल्मीकि रामायणस्य सम्पूर्ण समीक्षणं कृत्वा सप्रमाणं अध्यायमिदं पूरितवान्। अत्र साक्षात् गोतत्वस्य वर्णनं नास्ति।

युद्धकाण्डे चतु: सप्ततितमे सर्गे रामस्य राज्याभिषेक: वर्णितः। राज्याभिषेके वेदमार्गे निष्णाता: वसिष्ठवामदेवादय: मन्त्रपूर्वकं सलिलेन अभिषेकं चक्रुः। तस्मिन्नेवावसरे पुन: गोदानस्य प्रसंग: उपस्थित: -

सहस्रशतमश्वानां धेनूनां च गवां तथा।
ददौ शतं वृषान् पूर्वं द्विजेभ्यो मनुजर्षभ।।
त्रिंशत्कोटिहिरण्यस्य ब्राह्मणेभ्यो ददौ पुनः।
नानाभरणवस्त्राणि महार्हाणि च राघवः।।[24]

अन्ते रामराज्यस्य तात्विकं चिन्तनं वर्तते कतिपयैः श्लोकै: -

न पर्यदेवन् विधवा न च व्यालकृतं भयम्।
न व्याधिजं भयं चासीद्रामे राज्यं प्रशासति।।
निर्दुस्युरभवल्लोको नानर्थकश्चिदस्पृशत्।
न च स्म वृद्धा बालानां प्रेतकार्याणि कुर्वते।।
ब्राह्मणा: क्षत्रिया वैश्या: शूद्रा: लोभविवर्जिताः।
स्वकर्मसु प्रवर्तन्ते तुष्टा: स्वैरेव कर्मभिः।।
दशवर्षसहस्राणि दशवर्षशतानि च।
भ्रातृभि: सहित: श्रीमान् रामो राज्यमकारयत्।
धन्यं यशस्यमायुष्यं राज्ञां च विजयावहम्।
आदिकाव्यमिदं त्वार्षं पुरावाल्मीकिना कृतम्।।

शान्तिः।

महाभारते गौतत्वस्य विमर्श:

महाभारतं अष्टादशपुराणेषु न परिगणितम्। पुराणानां मध्ये महाभ्ज्ञारतस्य गणना नास्ति। परन्तु वेदव्यासस्य रचना महाभारतमिति। अस्य महाभारतस्य कलेवरं बृहत्तमं वर्तते। महाभारतस्य कथाया: पुराणेषु विस्तरेण वर्णनं प्राप्यते। पुराणस्य सर्वा: कथा: प्रायेण महाभारते उपन्यस्ताः। महाभारतं मन्ये कथाया:, आख्यायिकाया: कोष: विभाति। अस्य विषये विदुषां समाजे एका उक्ति: सर्वत्र प्रसिद्धा -

"यदि हास्ति तदन्यत्र यन्ने हास्ति न तत् क्वचित्"

अयमर्थ: यत् विषय: अत्र महाभारते अंगीकृत: स एव विषय: अन्यत्र पुराणेषु उपपुराणेषु विस्तारित: तथा यो हि विषय: अत्र महाभारते नैव प्रस्तुत: स विषय: विश्वस्य कस्मिनपि वाङ्मये नास्ति इति उद्घोषो वर्तते व्यासस्य। व्यासस्य दृढो विश्वासोऽस्ति विश्वस्य सकलं ज्ञानं मया अत्र महाभारते उपन्यस्तम्। यन्न वर्णितं तस्य सर्वथाऽभाव: इति ज्ञेयः। अहो विश्वासस्य पराकाष्ठा। व्यासस्य अद्वितीया शक्तिरस्ति। आजीवनं ज्ञानस्य संकलनं कथा माध्यमेन सामाजिकानां अद्वितीयं ज्ञानं संवर्द्धनाय, परम्परां च प्रवहणाय व्यासेन महाभारतं व्यरचि। व्यासस्य विषये श्रूयते दिव्यदेहधर: कश्चित् प्रादुर्बभूव -

सारांशः

रामायणस्य सुन्दरकाण्डं विवेचकानां मते सर्वोत्तमं विभाति यतोहि गाथा वर्णिता। सामाजिकशिक्षाया: कृते इदमादिकाव्यं ज्ञानविज्ञानयुतं विद्यते। पाश्चात्यानां दृष्टौ अयं संसार: षट् सहस्त्रसंवत्सर: प्राचीन: अस्ति। तथैव भारतस्यापि इतिहास: तै: स्वीक्रियते। कस्यापि मासस्य शक्लपक्ष उत्तरदक्षिणयोर्मध्ये समानो भवति। आश्विनशुक्लपक्षस्य विषये श्रीराम: यथा ब्रूते तथैव वानरा: वदन्ति तथा च आश्विनशुक्लपूर्णिमाया: अग्रिमोदिवस: श्रीरामस्य कृते कार्तिककृष्णपक्ष: प्रतिपत्तिथि: आसीत् सा च तिथि: वानराणां कृते आश्विनकृष्णप्रतिपत् आसीत् । अस्माक आयोणां कृते गोदानं पुण्यस्य मंगलस्य च कार्यं भवति। सर्वेषु कर्मसु तीथेषु जन्म-मरण-विवाहेषु च गोदानं प्रशस्तम्। इदं कर्म यथा मनुष्याणां कृते प्रशस्तं तथैव वनेचराणामपि कृते आसीत्।

सन्दर्भग्रन्थाः –

1. वाल्मीकिरामायणम् - बाल. 2.9
2. वायुपुराणम् - 70-48
3. 'वाल्मीकिरामायणम् - युद्धकायुम् - 42.18
4. महाभारतम् - द्रोण - 143.67-68
5. वाल्मीकिरामायण - किष्किन्धा - 20.14
6. वाल्मीकिरामायणे - किष्किन्धाकाण्डे - 20.24
7. वाल्मीकिरामायणम् - बालरामायण - 3.9
8. वाल्मीकिरामायणम् - बालरामायण - 4-1-3
9. वाल्मी. बाल - 6.5
10. वाल्मी. बाल. - 8-5-7
11. वाल्मीकि-रा.बा. 19-36
12. वाल्मीकि-रा.बाल - 19-36
13. वाल्मीकि रामायण - बाल. 20- 13-15
14. वाल्मीकि रामायण - बाल.-31.17-20
15. वाल्मीकि - किष्किन्धा - 12-10-11
16. वाल्मीकि - किष्किन्धा - 12.12-15
17. वाल्मीकि - किष्किन्धा - 12.20
18. वाल्मीकि - किष्किन्धा - 13-4-6
19. वाल्मीकि - किष्किन्धा - 13-20-22
20. वाल्मीकि - किष्किन्धा - 24.6
21. वाल्मीकि - किष्किन्धा - 26.6-7
22. वाल्मीकि - युद्ध - 63-11-13
23. वाल्मीकि - युद्ध - 63.25-26
24. वाल्मीकि - युद्ध – 74-8-9